# Newton's Academy

## संस्कृतम्

**अवधि: होराद्वयम्** **गुणाङ्का: 40**

**सूचना:**

(1) सूचनानुसारेण आकृतय: आरेखितव्या:।

(2) आकृतीनाम् आलेखनं मसीलेखन्या कर्तव्यम्।


(3) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।

(4) लेखनं सुवाच्यं, स्पष्टं लेखननियमानुसारं च भवेत्।


### प्रथम: विभाग:- सुगमसंस्कृतम्। (6)

**1. अ. चित्रं दृष्ट्वा नामानि लिखत। (4 त: 3)** [3]

1) 

2) 

3) 

4) 

**आ. सङ्ख्या: अक्षरै: / अङ्कै: लिखत। (3 त: 2)** [2]

1. नवविंशति:  2. ५३  3. शतम्

**इ. समय-स्तम्भमेलनं कुरुत।** [1]

| क्र. | अ | आ |
|---|---|---|
| 1. | विंशत्यधिक-दशवादनम् | ५.५० |
| 2. | पादोन-अष्टवादनम् | १०.२० |
| | | ७.४५ |

### द्वितीय: विभाग:- गद्यम्। (14)

**2. अ. गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।** [4]

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्राम:। स: ग्राम: पूर्णानदीतीरे वर्तते। तत्र जगद्गुरो: शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत्। तस्य पिता शिवगुरु: माता आर्याम्बा चास्ताम्। बाल्ये एव तस्य पिता शिवगुरु: दिवङ्गत:। तस्माद् मातैव पुत्रस्य पालनम् अकरोत्। पञ्चमे वयसि उपनीत: स: पठनार्थं गुरुमुपागच्छत्। तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान्। पठनादिकं समाप्य शङ्कर: गृहं प्रत्यागतवान्। गृहं प्राप्य मातृसेवाम् आरभत च। माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म। परन्तु मनसा वचसा कर्मणा च विरक्त: शङ्कर: संन्यासार्थम् अनुमतिं प्रार्थयत। शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता।

**1. अवबोधनम्। (3 त: 2)** **2**

**क. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** 1

शङ्करस्य मातैव पुत्रस्य पालनम् अकरोत् यत: .................।

(1) शङ्कराय केवलं माता अरोचत।

(2) बाल्ये एव तस्य पिता शिवगुरु: दिवङ्गत:।

**ख. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत।** 1

पञ्चमे वयसि उपनीत: शङ्कर पठनार्थं गुरुमुपागच्छत्।

**ग. एष: गद्यांश: कस्मात् पाठात् उद्धृत: ?** 1

**2. शब्दज्ञानम्। (3 त: 2)** **2**

**क. गद्यांशात् 2 पूर्वकालवाचक-धातुसाधित-ल्यबन्त-अव्यये चित्वा लिखत।** 1

**ख. गद्यांशात् विशेषण-विशेष्ययो: मेलनं कुरुत।** 1

| 'अ' | 'आ' |
|---|---|
| (1) शिवगुरु: | चिन्तामग्ना |
| (2) आर्याम्बा | दिवङ्गत: |
| | विरक्त: |

**ग. पूर्वपदं / उत्तरपदं लिखत।** 1

(1) चास्ताम् = ............................. + आस्ताम्।

(2) बालकोऽयम् = बालक: + ............................. ।

**आ. गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।** [4]

अस्ति एकं चम्पकं नाम अरण्यम्। अरण्ये चित्राङ्गो नाम मृग: एकाक्षो नाम काकश्च स्नेहेन निवसत: स्म। एकदा चित्राङ्ग: वने भ्रमन् केनापि शृगालेन अवलोकित:। क्षुद्रबुद्धि: नाम स: शृगाल: स्वार्थहेतुना मृगेण सह मित्रताम् ऐच्छत्। अस्तङ्गते सवितरि क्षुद्रबुद्धि: मृगेण सह मृगस्य निवासस्थानं गत:। मृगशृगालौ दृष्ट्वा काकोऽवदत्, "सखे चित्राङ्ग! कोऽयं द्वितीय:?" मृग: अब्रूत, "जम्बूकोऽयम्। अस्मत्सख्यम् इच्छति।" काक: उपादिशत्, "अकस्मादागन्तुना सह मित्रता न युक्ता।" तदाकर्ण्य जम्बूक: सकोपम् आह, "मृगस्य प्रथमदर्शने भवानपि अपरिचित: एव आसीत्। यथायं मृग: मम बन्धु: तथा भवानपि।" मृग: अब्रवीत्, "अलं विवादेन। वयं सर्वे आनन्देन एकत्र निवसाम:।" काकेनोक्तम्, " एवमस्तु।"

**1. अवबोधनम्। (3 त: 2)** **2**

**क. उचितं कारणं चित्वा वाक्यं पुनर्लिखत।** 1

शृगाल: मृगेण सह सख्यम् इच्छति यत: ............................. ।

(1) शृगाल: मृगमांसं खादितुम् इच्छति।

(2) शृगाल: मृगे स्निह्यति।


**ख. क: कं वदति?** 1

"अस्मत्सख्यम् इच्छति।"

**ग. अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत।** 1

मृगशृगालौ दृष्ट्वा <u>काक:</u> अवदत्।

**2. गद्यांशं पठित्वा जालरेखाचित्रं पूरयत।** **2**




NEWTON'S ACADEMY

**इ. गद्यांशं पठित्वा सरलार्थं लिखत। (2 त: 1)** [4]

1. शक्र: – (कर्णमुपगम्य) भो: कर्ण, महत्तरां भिक्षां याचे।
कर्ण: – दृढं प्रीतोऽस्मि भगवन्। एषोऽहं नमस्करोमि।
शक्र: – (आत्मगतम्) किं नु खल्वहं वदामि? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत्। यदि न वदेयम्, मूढ इति मां परिभवति। तस्माद् उभयं परिहृत्य किं नु खलु भाषे? भवतु, दृष्टम्।

2. नदी (विपाट्) – किम्? एष: मर्त्य: माम् माता इति सम्बोधयति?
नदी (शुतुद्री) – कथं माता न करोति साहाय्यं स्वपुत्रस्य? साधु मानवश्रेष्ठ साधु! किन्तु, कच्चित् तव वंशजा: मनुजा: तवेदं वचनं विस्मरिष्यन्ति?
विश्वामित्र: – न हि मात:, नैतत् शक्यम्।

**ई. माध्यमभाषया उत्तरं लिखत। (2 त: 1)** [2]

1. धरित्र्या: उपदेशं मनसि निधाय पृथुवैन्य: किं किम् अकरोत्?
2. दुष्यन्तस्य कानि स्वभाववैशिष्टयानि ज्ञायन्ते?

**तृतीय: विभाग:- पद्यम्।** (10)

**3. अ. पद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत। (5 त: 4)** [4]

यथैव सकला नद्य: प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्मा: समाश्रिता:।। १।।

षड्जमूला यथा सर्वे सङ्गीते विविधा: स्वरा:।
तथा मानवताधर्मं सर्वे धर्मा: समाश्रिता:।। २।।

यथा चतुर्भि: कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनै:।
तथा चतुर्भि: पुरुष: परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा।। ३।।

अयं न भक्तो न च पूजको वा
घण्टां स्वयं नादयते तथापि।
धनं जनेभ्य: किल याचतेऽयम्।
न याचको वा न च निर्धनो वा।। ४।।

**क. पूर्णवाक्येन उत्तरं लिखत।** 1
कनकपरीक्षा कथं भवति?

**ख. विशेषण-विशेष्ययो: मेलनं कुरुत।** 1

| | 'अ' | 'आ' |
|---|---|---|
| (1) | सकला: | स्वरा: |
| (2) | षड्जमूला: | धर्मा: |
| | | नद्य: |

**ग. जालरेखाचित्रं पूरयत।** 1

लोकयानवाहक:
- न भक्त:
- न ............................
- न ............................
- न याचक:

NEWTON'S ACADEMY

घ. **पद्यांशात् २ प्रथमा-विभक्त्यन्तपदे लिखत।** 1

च. **पूर्वपदं / उत्तरपदं लिखत।** 1

1. यथैव = यथा + ........................।   2. याचतेऽयम् = ........................ + अयम्।

आ. **पद्ये शुद्धे पूर्णे च लिखत। (3 त: 2)** [4]

1. वैद्यराज ........................ धनानि च।।   2. घटं भिन्द्यात् ........................ भवेत्।।
3. उत्तमौ ........................ प्रजायते।।

इ. **माध्यमभाषया सरलार्थं लिखत। (2 त: 1)** [2]

1. वृथाभ्रमणकुक्रीडापरपीडापभाषणै:।
कालक्षेपो न कर्तव्यो विद्यार्थी वाचनं श्रयेत्।।

2. एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम्।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम्।।

## चतुर्थ: विभाग:- भाषाभ्यास: (10)

4. अ. **पृथक्करणम्।** [4]

1. **मञ्जूषात: नामानि सर्वनामानि च पृथक्कुरुत। (5 त: 4)** 2

| नाम | सर्वनाम |
|---|---|
| | |

(**मञ्जूषा** – राजा, अहम्, सर्वे, कर्षक:, भिक्षाम्)

2. **मञ्जूषात: क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत। (5 त: 4)** 2

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

(**मञ्जूषा** – मन्यते, सेवमान:, गमनीय:, कथयति, पतिता)

आ. **निर्दिष्टा: कृती: कुरुत। (4 त: 2)** [4]

1. **सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (3 त: 2)** 2

क. ........................ महिला: जलम् आहर्तुं गच्छन्ति। (तिस्र: / त्रीणि)

ख. पौषमास: संवत्सरस्य ........................ मास:। (दश: / दशम:)

ग. तेन ........................ प्रयोग: कृत:। (त्रीणि / त्रिवारं)

2. **समासविग्रहाणां समासनामभि: सह मेलनं कुरुत। (6 त: 4)** 2

| समासविग्रह: | समासनाम |
|---|---|
| (1) परागस्य कणा:। | इतरेतर-द्वन्द्व:। |
| (2) न योग्यम्। | षष्ठी-तत्पुरुष:। |
| (3) मृग: च शृगाल: च। | कर्मधारय:। |
| (4) परम: अणु:। | उपपद-तत्पुरुष:। |
| (5) कुम्भं करोति इति। | बहुव्रीहि:। |
| (6) महान् भाग: यस्य स:। | नञ्-तत्पुरुष:। |

3. **मञ्जूषात: समानार्थकशब्दान्-विरुद्धार्थकशब्दान् चित्वा लिखत। (4 त: 2)** 2

1. कनकम् = .......................... ।
2. स्तुति: × .......................... ।
3. धनम् = .......................... ।
4. बद्ध: × .......................... ।

(**मञ्जूषा** – निन्दा, वित्तम्, सुवर्णम्, मुक्त:)

4. **योग्यं पर्यायं चिनुत। (3 त: 2)** 2

1. पृथुभूपेन धनु: सज्जीकृतम्। (कर्तृवाच्यम् / कर्मवाच्यम्)
2. त्वं नक्रात् .................. । (त्रायस्व/ त्रायताम्)
3. प्रजा: अतीव .................. आसन्। (कृश: / कृशा:)

**इ. विशिष्ट-विभक्ते: उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (4 त: 2)** [2]

1. गम्-गच्छ् (1 प.प.)
2. नम:
3. अलम्
4. दा-यच्छ् (1 प.प.)